# नालोपाख्यानं ४

बृहदश्व उवाच

सा नमसकृत्य देवेभ्यः प्रहस्य नलमब्रवीत्

प्रणयस्व यथाश्रद्धं राजन्किं करवाणि ते ॥१ ॥

अहं चैव हि यच्चान्यन्ममास्ति वसु किंचन

सर्वं तत्तव विश्रब्धं कुरु प्रणयमीश्वर ॥२ ॥

हंसानां वचनं यत्तत्तन्मां दहति पार्थिव

त्वत्कृते हि मया वीर राजानः संनिपातिताः ॥३ ॥

यदि चेद्भजमानां मां प्रत्याख्यास्यसि मानद

विषमग्निं जलं रज्जुमास्थास्ये तव कारणात् ॥४ ॥

एवमुक्तस्तु वैदर्भ्या नलस्तां प्रत्युवाच ह

तिष्ठत्सु लोकपालेषु कथं मानुषमिच्छसि ॥५ ॥

येषामहं लोककृतामीश्वराणां महात्मनाम्

न पादरजसा तुल्यो मनस्ते तेषु वर्तताम् ॥६ ॥

विप्रियं ह्याचरन्मर्त्यो देवानां मृत्युमृच्छति

त्राहि मामनवद्याङ्गि वरयस्व सुरोत्तमान् ॥७ ॥

ततो बाष्पकलां वाचं दमयन्ती शुचिस्मिता

प्रव्याहरन्ती शनकैर्नलं राजानमब्रवीत् ॥८ ॥

अस्त्युपायो मया दृष्टो निरपायो नरेश्वर

येन दोषो न भविता तव राजन्कथंचन ॥९ ॥

त्वं चैव हि नरश्रेष्ठ देवाश्चाग्निपुरोगमाः

आयान्तु सहिताः सर्वे मम यत्र स्वयंवरः ॥१० ॥

ततो ऽहं लोकपालानां संनिधौ त्वां नरेश्वर

वरयिष्ये नरव्याघ्र नैवं दोषो भविष्यति ॥११ ॥

एवमुक्तस्तु वैदर्भ्या नलो राजा विशां पते

अजगाम पुनस्तत्र यत्र देवाः समागताः ॥१२ ॥

तमपश्यंस्तथायान्तं लोकपालाः सहेश्वराः
दृष्ट्वा चैनं ततो ऽपृच्छन्वृत्तान्तं सर्वमेव तत् ॥१३ ॥
देवा ऊचुः
कच्चिद्दृष्टा त्वया राजन्दमयन्ती शुचिस्मिता
किमब्रवीच्च नः सर्वान्वद भूमिपते ऽनघ ॥१४ ॥
नल उवाच
भवद्भिरहमादिष्टो दमयन्त्या निवेशनम्
प्रविष्टः सुमहाकक्ष्यं दण्डिभिः स्थविरैर्वृतम् ॥१५ ॥
प्रविशन्तं च मां तत्र न कश्चिद्दृष्टवान्नरः
ऋते तां पार्थिवसुतां भवतामेव तेजसा ॥१६ ॥

सख्यश्चास्या मया दृष्टास्ताभिश्चाप्युपलक्षितः
विस्मिताश्चाभवन्दृष्ट्वा सर्वा मां विबुधेश्वराः ॥१७ ॥
वर्ण्यमानेषु च मया भवत्सु रुचिरानना
मामेव गतसंकल्पा वृणीते सुरसत्तमाः ॥१८ ॥
अब्रवीच्चैव मां बाला आयान्तु सहिताः सुराः
त्वया सह नरश्रेष्ठ मम यत्र स्वयंवरः ॥१९ ॥
तेषामहं संनिधौ त्वां वरयिष्ये नरोत्तम
एवं तव महाबाहो दोषो न भवितेति ह ॥२० ॥
एतावदेव विबुधा यथावृत्तमुदाहृतम्
मयाशेषं प्रमाणं तु भवन्तस्त्रिदशेश्वराः ॥२१ ॥